**निराबाध** त्रि० निर्गता आबाधा यस्य । १आबाधाशून्ये २व्यथाशून्ये ३प्रतिबन्धशून्ये च "दवीयान् महीधरो नेदीयान् दीर्घो बहुरिति व्यवहारस्य निराबाधं जागरूकत्वात्" सर्वदर्शनसं० । ४पक्षाभासभेदे पु० "अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम् । असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्" मिता० धृतवचनम् । "निराबाधम् अबाधत्वप्रदीपप्रकाशेनायं खण्डो व्यवहरतीति" मिताक्षरा ।

**निरामय** त्रि० निर्गत आमयात् प्रा०त० । १आमयरहिते रोगशून्ये अमरः । २वनच्छागले पुंस्त्री० मेदि० ३शूकरे शब्दमाला उभयत्र स्त्रियां जातित्वात् ङीप् । [शब्दच०

**निरमालु** पु० नितरां रमतेऽत्र रम–आलु । कपित्थवृक्षे

**निरामिष** त्रि० निर्गतमामिषमभिलाषो मांसाद्यामिषं वा यस्मात् प्रा०ब० । १लोभशून्ये "अध्यात्मरतिरासीनो निरपेक्षो निरामिषः" मनुः २मांसाद्यामिषहीने च "सामिषं कुररं दृष्ट्वा बध्यमानं निरामिषैः । आमिषस्य परित्यागात् कुररः सुखमेधते" भा०शा० ११९अ० । ३आमिषरहिते अन्नादौ । "नैवेद्यैश्च निरामिषैः" ति०त० ।

**निरालक** पुंस्त्री निर+अल–ण्वुल् । सामुद्रे मत्स्यभेदे "तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः" सुश्रु० ।

**निरालम्ब** त्रि० निर्गत आलम्बः अवलम्बनं यस्य प्रा०ब० । १अवलम्बनशून्ये "एवं मयि निरालम्बे शापात् शिथिलतां गते" हरिवं० १७अ० "निरालम्बो लम्बोदरजननि ! कं यामि शरणम्" जगन्नाथः । २आकाशमांस्यां स्त्री राजनि० । तस्या मूलरूपालम्बनशून्यत्वात्तथात्वम् ३ब्रह्मणि न० तदधिकारेण प्रवृत्ते ४उपनिषद्भेदे न उपनिषच्छब्दे १२२२पृ० दृश्यम् ।

**निरालोक** त्रि० निर्गत आलोक उद्योतो दृष्टिर्वा यस्मात् प्रा०ब० । आलोकशून्ये १अन्धकारे २आलोकनरहिते च "कृत्वा लोकान् निरालोकान्" भा०आ० २२अ० ।

**निराश** त्रि० निर्गता आशा यस्य प्रा०ब० । आशारहिते "निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्" ति०त० "मनो बभूवेन्दुमतीनिराशम्" रघुः । तस्य भावः ष्यञ् । नैराश्य आशाशून्यत्वे "आशा बलवती राजन् ! नैराश्यं परमं सुखम् । आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला" भा०शा० १७८अ० ।

**निराशिष्** त्रि० निर्गता आशीराशंसनं यस्य प्रा०ब० । १आशंसनशून्ये "जगच्छरण्यस्य निराशिषः सतः" कुमा० "निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः" गीता । वैराग्यदार्ढ्येन २विगततृष्णे च ।

**निराश्रय** त्रि० निर्गत आश्रय आधारोऽवलम्बनं वा यस्य । १आश्रयरहिते २आलम्बनरहिते च "चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया । तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्" सां०का० "निराश्रयं मां जगदीश ! रक्ष" उद्भटः "त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः" गीता "निराश्रयः योगक्षेमार्थमाश्रयणीयरहितः" श्रीधरः । ३अहंतदर्शनेन देहेन्द्रियाद्यभिमानशून्ये शब्दार्थचि० ।

**निरास** पु० निर+अस–भावे घञ् । १प्रत्याख्याने निराकरणे "तथा विज्ञानपक्षनिरासहेतुर्बाह्यप्रतीत्यादि" सां०प्रभा० । निर+आ+अस–अच् । २निरासके त्रि० "निरासैरसुभिः आत्मैस्तप्यमानैः स्वकर्मभिः" भा०शा० २७०अ० ।

**निराहार** त्रि० निर्गत आहारो यस्य प्रा०ब० । १आहारशून्ये "निराहाराश्च ये जीवाः" तर्पणमन्त्रः । निवृत्त आहारः प्रा०स० । २निवृत्ते आहारे "पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः" याज्ञ० अव्ययी० । ३आहाराभावे न० ।

**निरिङ्गिणी** स्त्री निम्नतमङ्गं निरङ्गं तदस्त्यस्या आच्छादकत्वेन इनि ङीप् । तिरस्करिण्यां प्रच्छदपटे त्रिका० ।

**निरिन्द्रिय** त्रि० निर्गतं निवृत्तमिन्द्रियं यस्य प्रा०ब० । इन्द्रियशून्ये "ये च केचिन्निरिन्द्रियाः" मनुः ।

**निरीति** त्रि० निर्गता ईतिर्यस्य । अतिवृष्ट्यादीतिशून्ये "निरीतिभावं गमितेऽतिवृष्ट्याः" नैष० "निरातङ्का निरीतयः" रघुः ।

**निरीष** न० निर्गतमीषायाः निरा०त० । फाले अमरः ।

**निरीश्वर** त्रि० निरस्त ईश्वरो यत्र प्रा०ब० । १ईश्वररहिते वादे "निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्" सां०प्र०भा०पद्मपु० । २तद्वादयुते नास्तिके । निरीशाख्योऽप्यत्र ।

**निरीह** त्रि० निर्गता ईहा यस्य प्रा०ब० । चेष्टाशून्ये "निरीहस्य हतद्विपः" रघुः निवृत्ता ईहा प्रा०त० । चेष्टाविरोधिव्यापारे स्त्री "शमो निरीहावस्थायामात्मविश्रामजं सुखम्" सा०द० ।

**निरुक्त** न० निर–वच–भावे क्त । १निर्वचने पदानामवयवार्थाः सम्भाविता निःशेषेण निश्चयेन उच्यन्ते यत्र आधारे वा० क्त । पदानामवयवार्थनिर्वचनप्रतिपादके